# निरुक्ते निपातार्थविचारः

**नीलकमलपण्डितः**
सहायकाचार्यः, दरङ्गहाविद्यालयः,तेजपुरम्
Email: nilkamalpandit71@gmail.com

**शोधसारः**

अखिलभूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागतग्रन्थेषु वेदास्सन्ति सर्वप्राचीनाः अपौरुषेयाभिधेयाः भारतीयसंस्कृतेराधाराश्च। वेदानां यथार्थतत्त्वज्ञानमत्यन्तं दुरूहं दुष्करञ्च वर्तते। तदर्थमेव वेदमर्मज्ञैः वेदात्मभूतयथार्थतत्त्वविद्भिः अपौरुषेयवाक्याभिधेयानां वेदानां याथार्थ्यं अवगन्तुमेव कानिचनाङ्गानि ऋषिभिर्दृष्टानि वर्तन्ते। तान्येव वेदाङ्गानीत्युच्यन्ते। वेदोपकारकभूतानि वेदाङ्गानि विद्यन्ते षट्। यथा- शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषञ्च। षड्विधवेदाङ्गेषु निरुक्तमन्यतमं वर्तते। यद्यपि निरुक्तस्य मुख्यविषयो वेदगतपदनिर्वचनमर्थप्रतिपादनञ्च तथाप्यत्र व्याकरणसम्बन्धिनो नैके विषयाः निरूपितास्सन्ति। तत्र निरुक्तग्रन्थस्य प्रथमकाण्डस्य प्रथमाध्याये निघण्ट्वाख्यसमाम्नायार्थनिरूपणावसरे यास्काचार्येण नाम-आख्यात-उपसर्ग-निपातानां स्वरूपं विवेचितम्। शोधपत्रेऽस्मिन् निरुक्तकारयास्काचार्येण प्रतिपादितं निपातस्वरूपं यथाशास्त्रं प्रतिपाद्यते।

**कूटशब्दाः-** वेदाङ्गम्, निरुक्तम्, निपातः।

**प्रस्तावना**

निखिलजगदादिमग्रन्थाभिहिताः भारतीयसनातनसंस्कृतेराधारभूताः परब्रह्मणो वाक्स्वरूपाः आधिभौतिकाधिदैविकाध्यामिकदुः खत्रयविदारकाः परमपुरुषार्थाख्यनिःश्रेयस-प्रदायकाः वर्तन्ते वेदाः। मन्त्रब्राह्मणात्मकानाञ्चतुर्दशविद्यास्थानेष्वन्यतमानां वेदानां यथार्थतत्त्वज्ञानमत्यन्तं दुरूहं दुष्करञ्च वर्तते। तदर्थमेव वेदमर्मज्ञैः वेदात्मभूतयथार्थतत्त्वविद्भिः अपौरुषेयवाक्याभिधेयानां वेदानां याथार्थ्यं अवगन्तुमेव कानिचनाङ्गानि ऋषिभिर्दृष्टानि वर्तन्ते। तान्येव वेदाङ्गानीत्युच्यन्ते। वेदानाम् अङ्गानि वेदाङ्गानि। अङ्गधातोः करणार्थे घञि अङ्गशब्दो निष्पद्यते। अङ्ग्यन्ते ज्ञायन्ते अमिभिरिति अङ्गानि, अङ्ग्यन्ते विषयो बुद्ध्यन्ते वानेनेति अङ्गानि। तदीयप्रधानफलजनकव्यापारजनकत्वे सति तदीयप्रधानफलाजनकत्वम् अङ्गत्वमिति तिथ्यादितत्त्वटीका। वस्तुतोऽङ्गशब्दस्यार्थोऽस्त्युपकारक इति। येन हि कस्यापि विषयस्य स्वरूपज्ञाने साहाय्यं प्राप्यते तदेव अङ्गमिति। एवञ्च वेदानामपि स्वरूपज्ञाने यानि अङ्गानि सन्ति तान्येव वर्तन्ते वेदाङ्गानि। वेदोपकारकभूतानि वेदाङ्गानि विद्यन्ते षट्। यथा- शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषञ्च। उक्तञ्च पाणिनीयशिक्षायाम्-

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीतयैव ब्रह्मलोके महीयते।।"[1]

**निरुक्तम्**

षड्विधवेदाङ्गेषु निरुक्तमन्यतमं वर्तते । निर्-उपसर्गपूर्वकं वच्-धातोः क्तप्रत्यये कृते निरुक्तमिति पदं निष्पद्यते । अस्य पदस्यार्थः - निःशेषेण उक्तम् अव्युत्पन्नानां शब्दानां धातुप्रत्ययोहनमिति। आचार्यसायणेन निरुक्तस्य लक्षणमेवमुक्तम्- "अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तमि"ति ऋग्वेदभाष्यभूमिका । इदं तु वेदानामर्थबोधकशास्त्रम्। यथा व्याकरणवेदाङ्गं वेदगतशब्दान् व्याकरोति, तथैव निरुक्तनामकं शास्त्रं वेदार्थान् अभिव्यनक्ति । वेदार्थबोधकस्यास्य निरुक्ताख्यवेदाङ्गस्य प्रणेता वर्तते आचार्ययास्कः। वस्तुतो निरुक्तवेदाङ्गं गवादिर्देवपत्न्यन्तरूपस्य निघण्ट्वाख्यवैदिकशब्दसमुदायस्य व्याख्यारूपमेव वर्तते। त्रिषु काण्डेषु विभक्तेऽस्मिन् निरुक्तशास्त्रे चतुर्दशाध्यायाः सन्ति । तत्र प्रथमाध्यायादारभ्य तृतीयाध्यायपर्यन्तं नैघण्टुककाण्डं, चतुर्थाध्यादारभ्य षष्ठाध्यायपर्यन्तं नैगमकाण्डं, सप्तमाध्यायादारभ्य द्वादाशाध्यायपर्यन्तं दैवतकाण्डं वर्तते।

**निपातार्थविचारः**

निरुक्तं वेदानामर्थबोधकं शास्त्रं तथापि इदं तु व्याकरणशास्त्रस्य परिपूरकमपि वर्तते । यद्यपि निरुक्तस्य मुख्यविषयो वेदगतपदनिर्वचनमर्थप्रतिपादनञ्च तथाप्यत्र व्याकरणसम्बन्धिनो नैके विषयाः निरूपितास्सन्ति । अतः निरुक्तग्रन्थस्य प्रथमकाण्डस्य प्रथमाध्याये निघण्ट्वाख्यसमाम्नायार्थनिरूपणावसरे यास्काचार्य आचष्टे - "तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति ।[2]" अर्थात् निघण्टुशास्त्रे नाम , आख्यातम्, उपसर्गो, निपातश्चेति चत्वार्येव पदजातानि सन्ति । तेषु चतुर्विधपदजातेषु निपातस्वरूपमत्र किञ्चिद्विचार्यते । तत्र निपातलक्षणमाचार्ययास्केन निरूपितमेवम्- "उच्चावचेष्वर्थेषु निपतन्ति"[3] इति। अर्थात् ये अनेकप्रकारकेष्वर्थेषु निपतन्तीति ते एव निपाताः। महर्षिपाणिनिनाऽप्युक्तम् अष्टाध्याय्याम्- 'चादयोऽसत्वे'[4] । अर्थात् अद्रव्यार्थाश्चादयो निपातसंज्ञकाः भवन्ति । चादयश्च स्वरादिगणे पठ्यन्ते। किञ्च निपातास्तु पूर्वोक्तनिरुक्तवचनेन परिज्ञायन्ते ते नैकप्रकारार्थयुता इति । अतः तदर्थविषये प्राह निरुक्तकार एवम्-"अप्युपमार्थेऽपि कर्मोपसङ्ग्रहार्थेऽपि पदपूरणाः"[5] अर्थात् निपातेषु केचन उपमार्थकाः, केचन कर्मोपसङ्ग्रहार्थाः, केचन च पदपूरणाः भवन्ति । एवं निपातानां त्रयोऽर्थभेदाः प्रदर्शिताः।

(क) **उपमार्थाः निपाताः** - उपमार्थाः निपाताः चतुर्विधाः भवन्ति। ते च यथा - 'इव' 'न' 'चित्' 'नु' चेति।

**इव**- 'इव' इति तु लौकिके वैदिके च उभयत्रापि प्रयुज्यते। लोके तु - मुखं चन्द्र इव, अग्निरिव तीक्ष्णः, इन्द्र इव विक्रान्त इत्यादि उपमार्थकस्योदाहरणं तु प्रसिद्धमेव। वेदेष्वपि यथा – "अहमेव वात इव"[6] , "स नः पितेव"[7]।

**न**- 'न' इति उपमार्थकनिपातो लौकिके निषेधार्थे एव प्रतिषेधार्थे वा प्रयुज्यते। यथा- घटो नास्ति पटो नास्ति इत्यादिलोकव्यवहारे नशब्दो अस्तित्वं प्रतिषेधति। वेदे तु 'न इति 'निपातः प्रतिषेधार्थीय उपमार्थीयश्च भवति। उक्तञ्च यास्काचार्येण- 'उभयमन्वध्यायम्'[8] इति। प्रतिषेधार्थीयस्योदाहरणं यथा "नेन्द्रं देवममसंत'[9] इति। अर्थात् इन्द्रं देवम् अमन्यन्त आदित्यरश्मय इति। तथा च यस्मात् प्रतिषेधति तद्द्योतकपदात् पूर्वं प्रतिषेधार्थीयनिपातस्य प्रयोगो भवति। उक्तमपि निरक्तकारेण- "प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत्प्रतिषेधति" इति तत्रैव। एवमुपमार्थीयस्योदाहरणत्वेन यथा- "दुर्मदासो न सुरायाम्"[10]।

**चित्** - चिदिति तु अनेकार्थको निपातः। उपमार्थेऽपि अस्य प्रयोगः। उदाहरणं यथा- दधिचित्। अर्थात् दधितुल्यम् इत्यर्थः। चिदिति निपातः पूर्वोक्तरीत्या नैकार्थयुक्तो भवति। स च पूजा-अवकुत्सितार्थे अपि प्रयुज्यते। तत्र लोके पूजायां यथा- "आचार्याश्चिदिदं ब्रूयाद्"[11] इति। अवकुत्सितार्थे च लोके - "कुल्माषांश्चिदाहर"[12] इति

**नु**- "अथाप्युपमार्थे भवति" इति यास्कवचनाद् प्रतीयते अस्य नुनिपातस्य उपमार्थे प्रयोगः। तत्र मन्त्रप्रामाण्यं यथा- "वृक्षस्य नु पुरुहूत वयाः"[13]। इति । नुनिपातो हेत्वपदेश-अनुपृष्टार्थेऽपि व्यवहृयते। अनुपृष्टे लोके यथा- "कथं नु करिष्यति" इति। हेत्वपदेशेऽपि अस्य प्रयोगो भवति। लौकिके हेत्वपदेशस्योदाहरणं यथा- "इदं नु करिष्यति "

**(ख) कर्मोपसङ्ग्रहार्थाः निपाताः**

निरुक्तकारकृतत्रिविधनिपातभेदेषु द्वितीयतरोऽयम्। अत्र कर्मशब्दोऽर्थपर्यायवचनः। कर्मोपसङ्ग्रहार्थ इत्यस्यार्थोऽर्थोपसङ्ग्रहार्थ इति। इत्थं च यस्मात्स द्वावर्थौ बहून्वा गृहीत्वा एकस्मिन्समसनकर्मणि उपसङ्गृह्णात्युपसमावेष्टयति तस्मादयं कर्मोपसङ्ग्रह इत्युच्यते।

**च**- 'च' इति 'निपातः कदाचित्समुच्चयार्थः सन् उभाभ्यामर्थाभ्यां विगृहीताभ्यामेव संयुक्तः प्रयुज्यते। यथोक्तं निरुक्तकारेण- "चेति समुच्चयार्थ उभाभ्यां संप्रयुज्यते"। यथा- "अहं च त्वं च वृत्रहन्। "[14]

**आ**- समुच्चयार्थे अस्य प्रयोगः। यथा - "देवेभ्यः पितृभ्य आ"[15]

**वा**- 'वा' इति विचारणार्थे समुच्चयार्थे च प्रयुज्यते। विचारणे यथा- "हन्तारं पृथिवीमिमां निदधानीहवेहवा"[16] इति | समुच्चयार्थे च यथा - "वायुर्वा त्वामनुर्वा त्वा"[17] |

**अह-** अयमपि विनिसङ्ग्रहार्थीयो निपातः। लौकिकोदाहरणं यथा-अहमहेदं करोत्वयमिदम्।

**ह-** ह इत्यपि विनिसङ्ग्रहार्थीयो निपातः। उदाहरणत्वेन यथा- इदं ह करिष्यति।

**उ-** अयमपि निपातो विनिसङ्ग्रहार्थ एव भवति । यथा-"मृषेमे विदन्ति सत्यमु ते वदन्ति"[18]। पदपूरणोऽपि भवति अयं निपातः । उदाहरणं यथा- 'इदमु त्यत्पुरुतमम्'[19]

**हि-** हीति अनेकार्थको निपातः। तत्र हेत्वपदेशस्योदाहरणं यथा- "इदं हि करिष्यति" इति निरुक्तम् १/२/५ हेत्वपदेशे यथा- इदं हि करिष्यति इति अनुपृष्टे च- कथं हि करिष्यति । असूयायामपि यथा- कथं हि व्याकरिष्यति इति।

**किल-** विद्याप्रकर्षार्थे लोके अस्य प्रयोगो दृश्यते । यथा-' एवं किल' एवं न, ननु इत्येताभ्यां किलप्रयोगोऽनुपृष्टे भवति। उदाहरणं यथा- न किलैवम्, "ननु किलैवम्।"

**मा-** मा इति प्रतिषेधे लोके प्रयुज्यते। यथा- मा कार्षीः ।

**खलु-** खलु इति प्रतिषेधे पदपूरणे च व्यवहृयते। यथा- खलु कृत्वा I पदपूरणे अपि यथा - एवं खलु तद्बभूव।

**शश्वत्** - अयं निपातो भाषायामर्थात् लोके विचिकित्सार्थे अनुपृष्टार्थे अस्वयं पृष्टे च भवति। यथा- शश्वद्ब्राह्मणोऽयम् इति विचिकित्सार्थे। अनुपृष्टे यथा- शश्वदेवम् , अस्वयं पृष्टे यथा- एवं शश्वत्।

**नूनम्-** विचिकित्सार्थीयोऽयं निपातः पदपूरणश्च । लोकवेदयोः विचिकित्सार्थस्योदाहरणं क्रमेण यथा- "नूनं तव गृहे धनम्", "न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम्"[20]। पदपूरणे वेदे च यथा- " नूनं सा ते प्रति वरं जरित्रे "[21]।

**सीम्-** निपातोऽयं परिग्रहार्थीयः पदपूरणश्च । परि सर्वतो ग्रहणं ज्ञानं परिग्रहः , स अर्थो यस्य स परिग्रहार्थः स एव परिग्रहार्थीयः। अस्योदाहरणं यथा- विसीमतः सुरुचो वेन आवः"[22] पदपूरणे यथा- "प्रसीमादित्योऽसृजत।"[23]

**त्व-** त्व इत्ययं निपातः विनिग्रहार्थीयो वर्तते। यथा- "उतो त्वस्मे तन्वं विसस्र।"[24]

**त्वत्-** समुच्चयार्थे निपातोऽयं प्रयुज्यते वेदे। यथा- "पर्याया इव त्वदाश्विनम्।" [25]

**(ग) पदपूरणाः निपाताः** –

एवं हि उपमार्थक-कर्मोपसङ्ग्रहार्थकनिपातस्वरूपवर्णनादनन्तरं पदपूरणनिपातानां स्वरूपं यास्काचार्येण निरूपितम् । तत्र निपाताः गद्यग्रन्थेषु वाक्यपूरणाः, छन्दोबद्धपद्येषु च पदपूरणाः वर्तन्ते । तत्र पदपूरणाः निपाताः यथा- कम्, ईम्, इत्,उ चेति । एते पुनः निपाताः प्रायेणानर्थका एव भवन्ति । अत्र पदपूरणानां उदाहरणानि यथा-

**कम्-** "मुञ्चामि त्वा हविषा जीवनाय कम्।" [26]

**ईम्**- 'एमेनं सृजतासुते।'[27]

**इत्**- "तमिद्वर्धन्तु नो गिरः।"[28]

**उ**- "अयमु ते समतसि।"[29]

कदाचित् इव इति निपातो वाक्यपूरणार्थे प्रयुज्यते। स च निपातः अनर्थक एव भवति। यथा- "सुविदुरिव", "सुविज्ञायते इव"[30] इति। किञ्च क्वचित् न इत्येष इदित्यनेन संप्रयुज्यते चेत् परिभयार्थे भवति। नेत इत्यस्योदाहरणं यथा- "शचीर्मदन्त उत दक्षिणाभिर्नेज्जह्यायन्त्यो नरकं पताम"[31]।

तथा न-च इत्येताभ्यां इद् इति संप्रयोगे अनुपृष्टार्थो भवति। न चेत्-इत्येतस्य उदाहरणं यथा- ''न चेत्सुरां पिबन्ति''[32]।

**उपसंहारः**

एवं हि निरुक्तकारयास्काचार्येण निरुक्तस्य प्रथमकाण्डस्य प्रथमाध्याये निपातस्वरूपं वर्णितम्। तत्र तेन निपाताः उपामार्थक-कर्मोपसङ्ग्रहार्थक-पदपूरणाः इति त्रिधा विभाजिताः वर्तन्ते। तथा प्रसङ्गानुक्रमेण निपातानां त्रैविध्यनिरूपणं लौकिकवैदिकोदाहरणेन व्याख्यात्मकरीत्या प्रतिपादितम् आचार्ययास्केन। एवं हि उपर्युक्तपर्यालोचनेन ज्ञायते यत् निपाताः बहुप्रकारेष्वर्थेषु प्रयुज्यन्ते। अतः तेषामर्थग्रहणं यथाशास्त्रं यथाप्रसङ्गं परीक्ष्य कर्तव्यमिति शम्।

---

**पादटीका :**

1 पाणिनीयशिक्षा ४१,४२

2 निरुक्तम् १/१/१

3 निरुक्तम् १/२/२

4 अष्टाध्यायी १/४/५७

5 निरुक्तम् १/२/२

6 ऋग्वेदसंहिता १०/१२५/०८

7 ऋग्वेदसंहिता १/१/९

8 निरुक्तम् १/२/२)

9 ऋग्वेदसंहिता ८/४/१

10 ऋग्वेदसंहिता ५/७/१९

11 निरुक्तम्-१/२/२

12 तत्रैव

13 ऋग्वेदसंहिता ४/६/१७

[14] ऋग्वेदसंहिता ६/४/२३
[15] ऋग्वेदसंहिता ७/६/२२
[16] ऋग्वेदसंहिता ८/६/२७
[17] शुक्लयजुर्वेदसंहिता - ९/७
[18] निरुक्तम्-१/२/५
[19] ऋग्वेदसंहिता ३/८/२
[20] ऋग्वेदसंहिता २/४/१०
[21] ऋग्वेदसंहिता २/६/६
[22] शुक्लयजुर्वेदसंहिता १३/३
[23] ऋग्वेदसंहिता २/७/९
[24] ऋग्वेदसंहिता -८/२/२३
[25] ऋक्प्रातिशाख्यम्- १२/१०
[26] ऋग्वेदसंहिता -८/८/१९/१
[27] ऋग्वेदसंहिता -१/१/१७/२
[28] ऋग्वेदसंहिता -७/१/२०
[29] ऋग्वेदसंहिता १/२/२८
[30] ऋग्वेदसंहिता १/३/११
[31] ऋग्वेदसंहिता -१/३/११
[32] निरुक्तम्१/३/११

**सन्दर्भग्रन्थाः**

SONTAKKE, N. S. and C. G. KASHIKAR. *ऋग्वेदसंहिता*. New Delhi: Rastriya Sanskrit Samsthan, 2014.

झा, नरेश. *अष्टाध्यायी*. वाराणसी: चौखम्बा सुरभारती प्रकाशन, 2021.

द्विवेदी, कपिलदेव. *वैदिक साहित्य एवं संस्कृति*. वाराणसी: विश्वविद्यालय प्रकाशन, 2018.

पाठक, जगन्नाथ. *ऋग्वेदभाष्यभूमिका,* . वाराणसी: चौखम्बा विद्याभवन, 2019.

शर्मा, मुकुन्द झा. *निरुक्तम्-*. वाराणसी: चौखम्बा संस्कृत प्रतिष्ठान, 2016.

शास्त्री, सिताराम. *निरुक्तम्*. वाराणसी: परिमल पाब्लिकेशन्स, 2017.